# ॥ મહા નારાયણોપનિષત ॥

॥ હરિઃ ઓં ॥

સહસ્ર શીર્ષં દેવં વિશ્વાક્ષં વિશ્વશંભુવં ।
વિશ્વં નારાયણં દેવમક્ષરં પરમં પદં ॥
વિશ્વતઃ પરમાન્નિત્યં વિશ્વં નારાયણગં હરિમ ।
વિશ્વમેવેદં પુરુષસ્તદ્વિશ્વમુપજીવતિ ॥
પતિં વિશ્વસ્યાત્મેશ્વરગં    શાશ્વતગં શિવમચ્યુતં ।
નારાયણં મહાજ્ઞેયં વિશ્વાત્માનં પરાયણમ ॥
નારાયણ પરોજ્યોતિ રાત્મા નારાયણઃ પરઃ ।
નારાયણ પરંબ્રહ્મતત્ત્વં નારાયણઃ પરઃ ॥
નારાયણ પરો ધ્યાતા ધ્યાનં નારાયણઃ પરઃ ।
યચ્ચકિંચિ જ્જગત સર્વં દૃશ્યતે શ્રૂયતે પિ વા ॥
અંતર્બહિશ્ચતત્સર્વં વ્યાપ્ય નારાયણઃ સ્થિતઃ ।
અનંતમવ્યયં કવિગં સમુદ્રેંતં વિશ્વશંભુવમ ॥
પદ્મકોશ પ્રતીકાશગં હૃદયં ચાપ્યધોમુખમ ।
અધો નિષ્ટ્યાવિતસ્ત્યાંતે નાભ્યામુપરિ તિષ્ઠતિ ॥
જ્વાલમાલાકુલં ભાતિ વિશ્વસ્યાયતનં મહત ।
સંતતગં શિલાભિસ્તુ લંબત્યાકોશસન્નિભં ॥
તસ્યાન્તે સુષિરગં    સૂક્ષ્મં તસ્મિન સર્વં પ્રતિષ્ઠિતમ ।
તસ્ય મધ્યે મહાનગ્નિર્વિશ્વાર્ચિર્વિશ્વતોમુખઃ ॥
સોગ્રભુગ વિભજંતિષ્ઠન્નાહારમજરઃ કવિઃ ।
તિર્યગૂર્ધ્વ મધશ્ચાયી રશ્મય સ્તસ્ય સંતતાઃ ॥
સંતાપયતિ સ્વંદેહમાપાદ તલમસ્તકઃ ।

તસ્ય મધ્યે વહ્નિશિખા અણીયોર્ધ્વા વ્યવસ્થિતઃ ॥
નીલતોયદમધ્યસ્થાદ્વિદ્યુલ્લેખેવ ભાસ્વરા ।
નીવારશૂકવત્તન્વી પીતા ભાસ્વત્યણૂપમા ॥
તસ્યાશ્શિખાયા મધ્યે પરમાત્માવ્યવસ્થિતઃ ।
સ બ્રહ્મ સ શિવસ્સહરિસ્સેંદ્રસ્સોક્ષરઃ પરમઃ સ્વરાટ ॥
ઓં તદ્બ્રહ્મ । ઓં તદ્વાયુઃ । ઓં તદાત્મા । ઓં તત્સત્યં । ઓં તત્સર્વં ।
ઓં તત્પુરોર્નમઃ । અંતશ્ચરતિ ભૂતેષુ ગુહાયાં વિશ્વ મૂર્તિષુ ।
ત્વં યજ્ઞસ્ત્વંવષટ્કારસ્ત્વમિંદ્રસ્ત્વગંરુદ્રસ્ત્વંવિષ્ણુસ્ત્વં બ્રહ્મ ત્વં
પ્રજાપતિઃ ।
ત્વં તદાપ આપોજ્યોતીરસોમૃતં બ્રહ્મભૂર્ભુવઃસુવરોં ॥
( ઋતગં સત્યં પરં બ્રહ્મપુરુષં કૃષ્ણપિંગલમ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો નમઃ ॥ )
ઓં નારાયણય વિદ્મહે વાસુદેવાય ધીમહિ ।
તન્નો વિષ્ણુઃ પ્રચોદયાત ॥
॥ શ્રીકૃષ્ણાર્પણમસ્તુ